श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपद्मपुराणे

# ॥ श्रीदामोदराष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीदामोदराष्टकम् ॥

नमामीश्वरं सच्चिदानन्दरूपं
    लसत्कुण्डलं गोकुले भ्राजमानम्।
यशोदाभियोलूखलाद्धावमानं
    परामृष्टम् अत्यन्ततो द्रुत्य गोप्या॥ १॥

रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं
    कराम्भोज-युग्मेन सातङ्कनेत्रम्।
मुहुःश्वास कंप-त्रिरेखाङ्ककण्ठ-
    स्थितग्रैवं दामोदरं भक्तिबद्धम्॥ २॥

इतीदृक् स्वलीलाभिरानन्द कुण्डे
    स्वघोषं निमज्जन्तमाख्यापयन्तम्।
तदीयेशितज्ञेषु भक्तैर्जितत्वं
    पुनः प्रेमतस्तं शतावृत्ति वन्दे॥ ३॥

वरं देव ! मोक्षं न मोक्षावधिं वा
    न चान्यं वृणेऽहं वरेशादपीह।
इदं ते वपुर्नाथ गोपाल बालं
    सदा मे मनस्याविरास्तां किमन्यैः॥ ४॥

इदं ते मुखाम्भोजमत्यन्तनीलै-
    र्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे
    मनस्याविरास्तामलं लक्षलाभैः॥ ५॥

नमो देव दामोदरानन्त विष्णो
    प्रसीद प्रभो दुःख जालाब्धिमग्नम्।

www.prapatti.com

कृपादृष्टि वृष्ट्यातिदीनं बतानु-
गृहाणेश मामज्ञमेध्यक्षिदृश्यः ॥ ६ ॥

कुबेरात्मजौ बद्धमूर्त्यैव यद्वत्
त्वयामोचितौ भक्तिभाजौकृतौ च।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह॥ ७ ॥

नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदरायाथ विश्वस्य धाम्ने।
नमो राधिकायै त्वदीयप्रियायै
नमोऽनन्त लीलाय देवाय तुभ्यम्॥ ८ ॥

॥ इति श्रीदामोदराष्टकं संपूर्णम् ॥

www.prapatti.com